१०५८ घ

क्र० २९
सं०

नं० १०८४८-घ

(तैत्तिरीयोपनिषद: शिक्षाध्याय: (शिक्षावल्ली)

पनिद:
तैत्तिरीयो/ कतिचिद्वेदमन्त्रा: (शिक्षावल्ली)
पत्राणि ६ (सम्पूर्णम)
नं० १०५७-घ
पत्राणि ६

दन्तागता
तैत्तिरीयोपनिषं चित्तिउपनिष

॥चि॰उ॰॥ श्रीगणेशायनमः॥ ॐ गणनाथसरस्वतीरविशुक्रोबृहस्पतिः॥ पंचैतानिस्मरेन्
॥१॥ नित्यंवेदवाणीप्रवर्त्तते॥१॥ ओंतछंयोरावृणीमहे। गातुंयज्ञाय। गातुंयज्ञपत
ये। दैवीस्वस्तिरस्तुनः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वंजिगातुभेषजं। शंनोअस्तुद्विपदे। शं
चतुष्पदे। ओं शांतिः शांतिः शांतिः। चित्तिःस्रुक्। चित्तमाज्यं। वाग्वेदिः। आधीतंबर्हिः।
केतोअग्निः। विज्ञातमग्निः। वाचस्पतिर्होता। मनउपवक्ता। प्राणोहविः। सामाध्वर्युः॥
वाचस्पतेविधेनामन्। विधेमतेनाम। विधेस्त्वमस्माकंनाम। वाचस्पतिःसोमंपिब।
तु। अस्मासुनृम्णंधात्स्वाहा॥२॥ अध्वर्युः। पंचचपृथिवीहोता। द्यौरध्वर्युः। रुद्रोग्नी
त्। बृहस्पतिरुपवक्ता। वाचस्पतेवाचोवीर्येण। संभृततमेनायक्ष्यसे। यजमानायवा
र्यं। आसुवस्करस्मै। वाचस्पतिःसोमंपिबति। जजनदिंद्रमिंद्रियायस्वाहा। पृथिवीहो
तादश॥३॥ अग्निर्होता। अश्विनाध्वर्यू। त्वष्टाग्नीत्। मित्रउपवक्ता। सोमःसोमस्यपु
रोगाः। शुक्रःशुक्रस्यपुरोगाः। श्रातास्तइंद्रसोमाः। वातापेर्हवनश्रुतःस्वाहा॥४॥ अ
ग्निर्होताष्टौ। सूर्यंतेचक्षुः। वातंप्राणः। द्यांपृष्ठं। अंतरिक्षमात्मा। अंगैर्यज्ञं। पृथिवींश
रीरैः। वाचस्पतेच्छिद्रयावाचा। अच्छिद्रयाजुह्वा। दिविदेवावृधंहोत्रामेरयस्वस्वा
हा॥५॥ सूर्यंतेनव। महाहविर्होता। सत्यहविरध्वर्युः। अच्युतपाजाअग्नीत्। अच्युत
मनाउपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरौ। अयास्यउद्गाता। वाच
स्पतेहृद्विधेनामन्। विधेमतेनाम। विधेस्त्वमस्माकंनाम। वाचस्पतिःसोमममपात्॥ ॥१॥

मा दैव्यस्तंतुश्छेदि मा मनुष्यः। नमो दिवे। नमः पृथिव्यै स्वाहा ॥१॥ अपान्नीलिच। वाग्घो
ता। दीक्षापत्नी। वातोध्वर्युः। आपोभिगरः। मनोहविः। तपसि जुहोमि। भूर्भुवः सुवः। ब्र
ह्म स्वयंभुः। ब्रह्मणे स्वयंभुवे स्वाहा ॥१॥ या घ्घोतानव ॥६॥ ब्राह्मण एक होता। स यज्ञः। स मे
ददातु। प्रजां पशून्पुष्टिं यशः। यज्ञश्च मे भूयात्। अग्निर्द्विहोता। स भर्ता। स मे ददातु। प्र
जां पशून्पुष्टिं यशः। भर्ता च मे भूयात्। पृथिवी त्रिहोता। स प्रतिष्ठा ॥१॥ स मे ददातु प्रजां
पशून्पुष्टिं यशः। प्रतिष्ठा च मे भूयात्। अंतरिक्षं चतुर्होता। स विष्ठाः। स मे ददातु ० यशः।
विष्ठाश्च मे भूयात्। वायुः पंचहोता। स प्राणः। स मे ० यशः। प्राणश्च मे भूयात् ॥२॥ चंद्र
मा षड्ढोता। स ऋतून्कल्पयाति। स मे ० यशः। ऋतवश्च मे कल्पंताम्। अन्नꣳ सप्तहो
ता। स प्राणस्य प्राणः। स मे ० यशः। प्राणस्य च मे प्राणो भूयात्। द्यौरष्टहोता। सोनाधृष्यः
॥३॥ स मे ० यशः। अनाधृष्यश्च भूयासं। आदित्यो नवहोता। स तेजस्वी। स मे ० यशः। तेजस्वी
च भूयासं। प्रजापतिर्दशहोता। स इदꣳ सर्वं। स मे ० यशः। सर्वं च मे भूयात्। प्रतिष्ठा प्रा
ण श्च मे भूयादनाधृष्यः सर्वं च मे भूयात् ॥७॥ ब्राह्मणो यज्ञो ग्निर्भर्ता पृथिवी प्रति।
ष्ठांतरिक्षं विष्ठा वायुः प्राणश्चंद्रमा। ऋतून न्नꣳ स प्राणस्य प्राणो द्यौरनाधृष्य
आदित्यः स तेजस्वी प्रजापतिः स इदꣳ सर्वं दश्रो। अग्निर्यजुर्भिः। सविता स्तोमैः ॥
इंद्र उक्थामदैः। मित्रावरुणा वाशिषा। अंगिरसो धिष्णियैरग्निभिः। मरुतः सदोह
विर्धानाभ्यां। आपः प्रोक्षणीभिः। ओषधयो बर्हिषा। अदितिर्वेद्या। सोमो दीक्षया। त्व

॥चि॰ऊ॰॥ धूमेन। विष्णुर्यज्ञेन। वसवु आज्येन। आदित्यादक्षिणाभिः। विश्वेदेवाऊर्जा। पूषास्व।
॥२॥ गाकारेण। बृहस्पतिः पुरोधया। प्रजापतिरुद्गीथेन। अंतरिक्षंपवित्रेण। वायुःपा
२ त्रैः। अहं श्रद्धया॥२॥ दीक्षयापात्रैरेकंच। ८। सेनेंद्रस्य। धेनाबृहस्पतेः। पथ्यापूष्णः।
वाग्वायोः। दीक्षासोमस्य। पृथिव्यग्नेः। वसूनांगायत्री। रुद्राणांत्रिष्टुप्। आदित्यानां
जगती। विष्णोरनुष्टुप्। वरुणस्यविराट्। यज्ञस्यपंक्तिः। प्रजापतेरनुमतिः। मित्रस्य
श्रद्धा। सवितुः प्रसूतिः। सूर्यस्यमरीचिः। चंद्रमसोरोहिणी। ऋषीणामरुंधती। प
र्जन्यस्यविद्युत्। चतस्रोदिशः। चतस्रोवांतरदिशाः। अहश्चरात्रिश्च। कृषिश्चवृष्टि
श्च। त्विषिश्चापचितिश्च। आपश्चौषधयश्च। ऊर्क्चसूनृताच। देवानांपत्नयः॥१॥
अनुष्टुप्‌ ... दिशः॥ ... देवस्यत्वासवितुःप्रसवे। अश्विनोर्बाहुभ्यां। पूष्णोहस्ताभ्यांप्र
तिगृह्णामि। राजात्वावरुणोनयतुदेविदक्षिणेग्नयेहिरण्यं। तेनामृतत्वमश्यां। व
योदात्रे। मयोमह्यमस्तु प्रतिग्रहीत्रे। कइदंकस्माअदात्। कामःकामाय। कामोदा
ता॥१॥ कामःप्रतिग्रहीता। कामंसमुद्रमाविश। कामेनत्वाप्रतिगृह्णामि। कामैतत्ते।
षात्तेकामदक्षिणा। उत्तानस्त्वांगीरसः प्रतिगृह्णातु। सोमायवासः। रुद्रायगां। वरु
णायाश्वं। प्रजापतयेपुरुषं॥२॥ मनवेतल्पं। त्वष्ट्रेजां। पूष्णेविं। निरृत्याअश्वतरग
र्दभौ। हिमवतोहस्तिनं। गंधर्वाप्सराभ्यः। स्रगलंकरणे। विश्वेभ्योदेवेभ्योधान्यं॥
वाचेन्नं। ब्रह्मणओदनं। समुद्रायापः॥३॥ उत्तानायांगीरसायानः। वैश्वानरायरथं॥ ॥२॥

वैश्वानरः प्रत्नथा नाकमारुहत्। दिवः पृष्ठं भंदमानः सुमन्मभिः। स पूर्ववज्जनयंजंतवे
पुनः। समानमस्मा परियाति जागृविः। राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय
रथं। तेनामृतत्वमश्यां। वयो दात्रे। मयो मह्यमस्तु प्रतिग्रहीत्रे॥ ४॥ क इदं कस्मा अदा
त्। कामः कामाय। कामो दाता। कामः प्रतिग्रहीता। कामꣳ समुद्रमाविश। कामेन।
त्वा प्रतिगृह्णामि। कामैतत्ते। एषा ते काम दक्षिणा। उत्तानस्त्वांगिरसः प्रतिगृह्णातु॥
॥५॥ दाता पुरुषमापः प्रतिग्रहीत्रे न च॥ ९॥ सुवर्णं घर्मं परिवेद वेनं। इंद्रस्यात्मानं
दशधा चरंतं। अंतः समुद्रे मनसा चरंतं। ब्रह्मान्वविंदद्दशहोतारमर्णे। अंतः प्रविष्टः
शास्ता जनानां। एकः सन्बहुधा विचारः। शतꣳ शुक्राणि यत्रैकं भवंति। सर्वे वेदा
यत्रैकं भवंति। सर्वे होतारो यत्रैकं भवंति। स मानसीन आत्मा जनानां॥ १॥ अंतः प्रवि
ष्टः शास्ता जनानाꣳ सर्वात्मा। सर्वाः प्रजा यत्रैकं भवंति। चतुर्होतारो यत्र संपदं ग
च्छंति देवैः। स मानसीन आत्मा जनानां। ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां। दिव आत्मानं
ꣳ सवितारं बृहस्पतिं। चतुर्होतारं प्रदिशोनु कॢप्तं। वाचो वीर्यं तपसान्वविंदत्। अंतः
प्रविष्टं कर्तारमेतं। त्वष्टारꣳ रूपाणि विकुर्वंतं विपश्चिं॥ २॥ अमृतस्य प्राणं यज्ञ।
मेतं। चतुर्होतॄणामात्मानं कवयो निचिक्यु। [illegible] अंतः प्रविष्टं कर्तारमेतं।
देवानां बंधु निहितं गुहासु। अमृतेन कॢप्तं यज्ञमेतं। चतुर्होतॄणामात्मानं कवयो नि
चिक्युः। शतं नियुतः परिवेद विश्वा विश्ववारः। विश्वमिदं वृणाति। इंद्रस्यात्मा
निहितः पंचहोता। अमृतं देवानामायुः प्रजानां॥ ३॥ इंद्रꣳ राजानꣳ सवितारमेतं॥

॥चि उ॥ वायोरात्मानं कवयो निचिक्युः। रश्मिं रश्मीनां मध्ये तपंतं। ऋतस्य पदे कवयो निपां
॥३॥ ति। य आंडकोशे भुवनं बिभर्ति। अनिर्भिन्नः सन्नथ लोकान्विचष्टे। यस्यांडकोशं शु
3 ष्ममाहुः प्राणमुल्बं। तेन क्लृप्तोऽमृतेनाहमस्मि। सुवर्णकोशं रजसा परीवृतं। दे
वानां वसुधानीं विराजं॥६॥ अमृतस्य पूर्णां तामु कलां विचक्षते। पादं षड्ढोतुर्न
किल विविद्से। येनर्तवः पंचधोत क्लृप्ताः। उत वा षड्धा मनसोत क्लृप्ताः। तं षड्ढो
तारमृतुभिः कल्पमानं। ऋतस्य पदे कवयो निपांति। अंतः प्रविश्य कर्तारमेतं। अंत
श्चंद्रमसि मनसा चरंतं। सहैव संतं न विजानंति देवाः। इंद्रस्यात्मानं शतधा चरं
तं॥प॥ इंद्रो राजा जगतो य ईशे। सप्तहोता सप्तधा विक्लृप्तः। परेतंतुं परिषिच्यमानं।
अंतरादित्ये मनसा चरंतं। देवानां हृदयं ब्रह्मान्वविंदत्। ब्रह्मैतद्ब्रह्मण उज्जभार।
अर्कं श्चोतंतं सरिरस्य मध्ये। आ यस्मिन्सप्त पेरवः। मेहंति बहुलां श्रियं।
बह्वश्वामिंद्र गोमतीं। अच्युतां बहुलां श्रियं। स हरिर्वसुवित्तमः। पेरुरिंद्राय पि
न्वते। बह्वश्वामिंद्र गोमतीं। अच्युतां बहुलां श्रियं। मह्यमिंद्रो नियच्छतु। शतं।
शता अस्य युक्ता हरीणां। अर्वाङायातु वसुभी रश्मिरिंद्रः। प्रमंहमाणो बहुलां
श्रियं। रश्मिरिंद्रः सविता मे नियच्छतु॥७॥ घृतं तेजो मधुमदिंद्रियं। मय्ययमग्नि
र्दधातु। हरिः पतंगः पटरी सुपर्णः। दिविक्षयो नभसा य एति। स न इंद्रः कामव
रं ददातु। पंचारं चक्रं परिवर्तते पृथु। हिरण्यज्योतिः सरिरस्य मध्ये। अजस्रं ज्योति ॥३॥
र्नभसा सर्पदेति। स न इंद्रः कामवरं ददातु। सप्त युंजंति रथमेकचक्रं॥८॥ एको अश्वो व

इति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं। येनेमा विश्वा भुवनानि तस्थुः। भद्रं पश्यंते।
त उपसेदुरग्रे। तपो दीक्षामृषयः सुवर्विदः। ततः क्षत्रं बलमोजश्च जातं। तदस्मै
देवा अभि संनमंतु। श्वेतं रश्मिं बोभुज्यमानं। अपां नेतारं भुवनस्य गोपां॥
इंद्रं निचिक्युः परमे व्योमन्। रोहिणीः पिंगला एकरूपाः। क्षरंतीः पिंगला एक
रूपाः। शतं सहस्राणि प्रयुतानि नाव्यानां। अयं यः श्वेतो रश्मिः परि सर्वमि
दं जगत्। प्रजां पशून् धनानि। अस्माकं ददातु। श्वेतो रश्मिः परि सर्वं बभूव। सुव
न्मह्यं पशून् विश्वरूपान्। पतंगमक्तमसुरस्य मायया। १९ हृदा पश्यंति मनसा म
नीषिणः। समुद्रे अंतः कवयो विचक्षते। मरीचीनां पदमिच्छंति वेधसः। पतंगो वा
चं मनसा बिभर्ति। तां गंधर्वो वदद्गर्भे अंतः। तां द्योतमानां स्वर्यं मनीषां। ऋत
स्य पदे कवयो नि पांति। ये ग्राम्याः पशवो विश्वरूपाः। विरूपाः संतो बहुधैकरूपाः
अग्निस्तां अग्रे प्रमुमोक्तु देवः। १९ प्रजापतिः प्रजया संविदानः। वीतं स्तु।
के स्तु के युवमस्मासु नि यच्छतं। प्रप्र यज्ञपतिं तिर। ये ग्राम्याः पशवो विश्वरूपाः
विरूपाः संतो बहुधैकरूपाः। तेषां सप्तानामिह रंतिरस्तु। रायस्पोषाय सुप्र
जास्त्वाय सुवीर्याय। य आरण्याः पशवो विश्वरूपाः। विरूपाः संतो बहुधैक
रूपाः। वायुस्तां अग्रे प्रमुमोक्तु देवः। प्रजापतिः प्रजया संविदानः। इडायै सृ
सं घृतवच्चराचरं। देवा अन्वविंदन् गुहा हितं। य आरण्याः पशवो विश्वरूपाः
विरूपाः संतो बहुधैकरूपाः। तेषां सप्तानामिह रंतिरस्तु। रायस्पोषाय सुप्र।

॥चि॰उ॰॥ जास्त्वायसुवीर्याय॥१॥ आत्माजनानांविकुर्वंतंविपश्चिंप्रजानांवसुधानींविराजं
॥४॥ चरंतं गोमतीमेनिंयच्छवेकचक्रंव्योमन्मायथादेवएकरूपाअष्टौच॥१२॥ ॐ
५ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्। सभूमिंविश्वतोवृत्वा अत्यतिष्ठद्द
शांगुलं। पुरुषएवेदं सर्वं यद्भूतंयच्चभव्यं। उतामृतत्वस्येशानः। यदन्नेनाति
रोहति। एतावानस्यमहिमा। अतोज्यायांश्चपुरुषः। पादोस्यविश्वाभूतानि। त्रि
पादस्यामृतंदिवि। त्रिपादूर्ध्वउदैत्पुरुषः। पादोस्येहाभवत्पुनः। ततोविष्वङ्व्य
क्रामत्। साशनानशनेअभि। तस्माद्विराडजायत। विराजोअधिपूरुषः। सजा
तोअत्यरिच्यत। पश्चाद्भूमिमथोपुरः॥५॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत।
वसंतोअस्यासीदाज्यं। ग्रीष्मइध्मः शरद्धविः। सप्तास्यासन्परिधयः। त्रिःसप्त
समिधः कृताः। देवायद्यज्ञंतन्वानाः। अबध्नन्पुरुषंपशुं। तंयज्ञंबर्हिषिप्रोक्षन्।
पुरुषंजातमग्रतः। तेनदेवाअयजंत। साध्याऋषयश्चये। तस्माद्यज्ञात्सर्वहुतः।
संभृतंपृषदाज्यं। पशूंस्तांश्चक्रेवायव्यान्। आरण्यान्ग्राम्याश्चये। तस्माद्य
ज्ञात्सर्वहुतः। ऋचः सामानिजज्ञिरे। छंदांसिजज्ञिरेतस्मात्। यजुस्तस्माद
जायत। तस्मादश्वाअजायंत। येकेचोभयादतः। गावोहजज्ञिरेतस्मात्। तस्मा।
ज्जाताअजावयः॥११॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन्। मुखंकिमस्यकौ
बाहू। कावूरूपादाउच्यते। ब्राह्मणोस्यमुखमासीत्। बाहूराजन्यः कृतः। ऊरूतद ॥४॥
स्ययद्वैश्यः। पद्भ्यांशूद्रोअजायत। चंद्रमामनसोजातः। चक्षोःसूर्योअजायत।

मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदंतरिक्षं । शीर्ष्णो द्यौः समवर्त्त
त । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ।१५। वेदाहमेतं पुरुषं म
हांतं । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वा
भिवदन्यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमे
वं विद्वानमृत इह भवति । नान्यः पंथा अयनाय विद्यते । यज्ञेन यज्ञमयजंत देवाः ।
तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचंते । यत्र पूर्वे साध्याः संति दे
वाः ।१८। पुरुषः पुरोगतो जायत कुतो कल्पयन्नासद्दे च ।१९। अद्भ्यः संभृतः पृ
थिव्यै रसाच्च । विश्वकर्मणः समवर्त्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषा
स्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महांतं । आदित्यवर्णं तमसः परस्तात् । त
मेवं विद्वानमृत इह भवति । नान्यः पंथा विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अंतः ।
अजायमानो बहुधा विजायते । तस्य धीराः परिजानंति योनिं । मरीचीनां पदमि
च्छंति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । न
मो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयंतः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्या
त् । तस्य देवा असन्वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपं ।
अश्विनौ व्यात्तं । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ।२। जायते वत्रोस
त च । भर्त्ता सन्भ्रियमाणो बिभर्त्ति । एको देवो बहुधा निविष्टः । यदा भारं तंद्रयते स
भर्त्तुं । निधाय भारं पुनरस्तमेति । तमेव मृत्युममृतं तमाहुः । तं भर्त्तारं तमु गोप्तारमा

॥चि॰उ॰॥ ङ्गः। सम्भृतो ऽग्नि यमो लोके बिभर्ति। यदेनं वेद सत्येन भर्तुं। सद्यो जातमुत जहात्येष उतो।
॥५॥ जरन्तं न जहात्येकं॥१॥ उतो बहूनेकमहर्जहार। अतन्द्रो देवः सदमेव प्रार्थः। यस्तद्वेद यु
5 त आबभूव संध्यां च यां संदधे ब्रह्मणैषः। रमते तस्मिन्नुत जीर्णे शयाने। नैनं जहा
त्यहः सुपूर्वेषु। त्वामापो अनु सर्वाश्चरन्ति जानतीः। वत्सं पयसा पुनानाः। त्वमग्निं
हव्यवाहं समिन्त्से। त्वं भर्ता मातरिश्वा प्रजानां॥२॥ त्वं यज्ञस्त्वमु वेवासि सोमः। तव
देवा हवमायन्ति सर्वे। त्वमेको ऽसि बहूननुप्रविष्टः। नमस्ते अस्तु सुहवो म एधि। न
मो वामस्तु श्रृणुतं हवं मे। प्राणापानावजिरं संचरन्तौ। ह्वयामि वां ब्रह्मणा।
तूर्तमेतं। यो मां द्वेष्टि तं जहितं युवाना। प्राणापानौ संविदानौ जहितं। अमुष्यासु
ना मा संगसाथां॥३॥ तं मे देवा ब्रह्मणा संविदानौ। वधाय दत्तं तमहं हनामि। अ
सज्जजान सत आबभूव। यं यं जजान स उ गोपो अस्य। यदा भारं तन्द्रयते स भर्तुं॥
परास्य भारं पुनरस्तमेति। तद्वै त्वं प्राणो अभवः। महान्भोगः प्रजापतेः। भुजः क
रिष्यमाणः। यद्देवान्प्राणयो नव॥४॥ एकं प्रजानां गसाथां नव॥१५॥ हरिं हरन्त
मनुयन्ति देवाः। विश्वस्येशानं वृषभं मतीनां। ब्रह्मस्वरूपमनुमेदमागात्। अय
नं मा विवधीर्विक्रमस्व। मा छिदो मृत्यो मा वधीः। मा मे बलं विवृहो मा प्रमोषीः। प्र
जां मा मे रीरिष आयुरुग्र। नृचक्षसं त्वा हविषा विधेम॥ सद्यश्चकमानाय। प्रवेपा
नाय मृत्यवे॥१॥ प्रास्मा आशा अशृण्वन्। कामेनाजनयन्पुनः। कामेन मे काम आ ॥५॥
गात्। हृदयाद्धृदयं मृत्योः। यदमीषामदः प्रियं। तदैतूप माममभि। परं मृत्यो अनुपरे

हि पंथां । यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि । मा नः प्रजा ᳪ रीरिषो ।
मोत वीरान् । प्रपूर्व्यं मनसा वंदमानः । नाधमानो वृषभं चर्षणीनां । यः प्रजानामेक
राण्मानुषीणां । मृत्युं यजे प्रथमजामृतस्य ॥ २ ॥ मृत्यवे वीरा ᳪ श्चत्वारि च ॥ १५ ॥ तु
रणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनं । उपयामगृहीतोसि
सूर्याय त्वा भ्राजस्वत । एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥ १६ ॥ तरणिस्त्रीणि च । आ
प्यायस्व मदिंतम सोम विश्वाभिरूतिभिः । भवा नः सप्रथस्तमः ॥ १७ ॥ ई युष्टे ये पूर्व
तरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः । अस्माभिरू नु प्रतिचक्ष्याभूदो ते यंति ये अ
परीषु पश्यान् ॥ १८ ॥ ज्योतिष्मतीं त्वा सादयामि । ज्योतिष्कृतं त्वा सादयामि । ज्योति
र्विदं त्वा सादयामि । भास्वतीं त्वा सादयामि । ज्वलंतीं त्वा सादयामि । मल्मलाभवंतीं
त्वा सादयामि । दीप्यमानां त्वा सादयामि । रोचमानां त्वा सादयामि । अजस्रां त्वा सा
दयामि । बृहज्ज्योतिषं त्वा सादयामि । बोधयंतीं त्वा सादयामि । जाग्रतीं त्वा सादया
मि ॥ १९ ॥ प्रयासाय स्वाहा । आयासाय स्वाहा । वियासाय स्वाहा । संयासाय स्वाहा । उद्यासा
य स्वाहा । अवयासाय स्वाहा । शुचे स्वाहा । शोकाय स्वाहा । तप्यत्वै स्वाहा । तपते स्वाहा ।
ब्रह्महत्यायै स्वाहा । सर्वस्मै स्वाहा ॥ २० ॥ चित्त ᳪ संतानेन भवं यक्ना रुद्रं तनिम्ना प
शुपति ᳪ स्थूलहृदयेनाग्नि ᳪ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमं
तः पार्श्वेनौषिष्ठहन ᳪ शिंगीनिकोश्याभ्यां ॥ १ ॥ चित्तमे[illegible]कं ॥ २१ ॥ चितिः पृथिव्यम
ग्निः सूर्यं ते चक्षुर्महाहविर्होता याज्ञोता । ब्राह्मणाएकहोताग्नियजुर्भिः सेनेंद्रस्य देव

॥चि-उ॥ स्यंसुवर्लोघर्मं ॐ सहस्रशीर्षाझोभर्त्ताहरिस्तुरस्लिराप्यायस्वेपुष्टये [illegible] ज्योतिः
॥६॥ ष्मतीं प्रयासायत्ववि तमेकं विपू श्रातिः ॥२१॥ चितिरग्नि यजुर्भिरंतः ॥ प्रविष्टप्रजापतिः
6 प्रजपाभर्त्तां सन्प्रयासायहृदिपं चाशान् ॥५२॥ तवं योराव्रंलीमहे० झं चतुष्पदे ॥ ओं
शांतिः शांतिः शांतिः ॥३॥ ॥शुभं भवतु॥ श्रीरस्तु ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

॥६६॥